# Rishibhih Proktam Kashikathasudhapanaphalam

# ઋષિભિઃ પ્રોક્તં કાશીકથાસુધાપાનફલમ્

## Document Information

Text title : Rishibhih Proktam Kashikathasudhapanaphalam

File name : kAshIkathAsudhApAnaphalam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | vAvRittashlokAH ||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

Rishibhih Proktam Kashikathasudhapanaphalam

# ઋષિભિઃ પ્રોક્તં કાશીકથાસુધાપાનફલમ્

ઋષય ઊચુઃ
કાશીકથાસુધાપાનાત્સન્તોષો યાદૃશોઽભવત્ ।
સન્તોષસ્તદૃશોઽસ્માકં સુધાપાનેઽપિ નો ભવેત્ ॥ ૯॥

કાશકથાસુધાપાનં ન કૃતં યેન સાદરમ્ ।
સ જીવન્ મૃત એવાન્ધઃ સ નીચઃ પુલ્કસાદપિ ॥ ૧૦॥

યથા દેવાઃ સુધાં પ્રાપ્ય સુપ્રીતાશ્ચ સુધાશનાઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૧॥

વિદ્યાઃ સમગ્રાઃ સમ્પ્રાપ્ય યથા પ્રીતા દ્વિજોત્તમાઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૨॥

યથા નવનિધીંલ્લબ્ધ્વા સન્તુષ્ટોઽભૂદ્ધનાધિપઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૩॥

યથા શિવાર્ચનાલ્લક્ષ્મીં લબ્ધ્વા પ્રીતો જનાર્દનઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૪॥

યથેશાત્પ્રાપ્ય વૈકુણ્ઠં સુપ્રીતોઽભૂજ્જનાર્દનઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૫॥

યથા શિવાર્ચનાલ્લબ્ધ્વા સ્વર્ગં પ્રીતઃ શચીપતિઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૬॥

યથા નવતૃણં પ્રાપ્ય પ્રીતા ગાવઃ ક્ષુધાતુરાઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૭॥

યથા પ્રીતાનિ સસ્યાનિ વૃષ્ટિં પ્રાપ્ય યથાહિતમ્ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૮॥

યથા યથેષ્ટમન્નાનિ લબ્ધ્વા પ્રીતઃ ક્ષુધાતુરઃ ।

કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૧૯॥

યથા કમ્બલવસ્ત્રાણિ લબ્ધ્વા પ્રીતો હિમાતુરઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૦॥

યથા યથેષ્ટં દ્રવિણં લબ્ધ્વા પ્રીતા ધનૈષિણઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૧॥

યથા કામાતુરાઃ(ન્) પ્રાપ્ય પ્રીતાઃ સ્યુર્નવયૌવનાઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૨॥

યથા પુત્રેષિણઃ પુત્રાંલ્લબ્ધ્વા પ્રીતાશ્ચિરાયુષઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૩॥

યથા પિતા સુતાન્ દૃષ્ટ્વા પ્રીતો વિદ્યાગુણોજ્જ્વલાન્ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૪॥

યથા વિદ્યા દ્વિજં પ્રાપ્ય સુપ્રીતા શિષ્ટસમ્મતમ્ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૫॥

યથા સત્પાત્રમાલમ્બ્ય સુપ્રીતો દાનતત્પરઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૬॥

યથા ચકોરઃ સુપ્રીતો લબ્ધ્વા ચન્દ્રકાલામૃતમ્ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૭॥

યથા શીતં જલં પ્રાપ્ય પાન્થઃ પ્રીતોઽર્કતાપિતઃ ।
કાશીકથાસુધાં પ્રાપ્ય સુપ્રીતાઃસ્મ તથા વયમ્ ॥ ૨૮॥

સૂતઃ
કાશ્યાં શિવઃ સ્વયં સાક્ષાત્સચ્ચિદાનન્દલક્ષણઃ ।
તસ્મિન્યસ્ય ભવેદ્ભક્તિઃ સ તુ ધન્યો મહાયશાઃ ॥ ૩૫॥

યઃ કાશીં દ્વેષ્ટિ મૂઢાત્મા સ શિવં દ્વેષ્ટિ વસ્તુતઃ ।
તતઃ સ નિરયં યાતિ સવંશ્યો નાત્ર સંશયઃ ॥ ૩૬॥

તેષાં કાશ્યાં ભવેચ્છ્રદ્ધા નાન્યેષાં સત્યમુચ્યતે ।
કાશી યતઃ શિવઃ સાક્ષાત્તતસ્તત્પ્રવણા જનાઃ ॥ ૮૫॥

નિર્મુક્તાઃ પાપસઙ્ઘેભ્યો ઘોરેભ્યઃ સત્યમુચ્યતે ।
કાશીકથાસુધા વિપ્રાઃ ! દુર્લભા દુર્લભાપિ સા ॥ ૮૬॥

સુલભા શિવભક્તાનાં શિવાર્થકૃતકર્મણામ્ ।
કાશીકથાસુધાં પ્રાપ્ય તપોધ્યાનસમાધિભિઃ ॥ ૮૭॥

તત્પ્રાપ્ત્યર્થં યતસ્તેષામુપયોગઃ શ્રુતિશ્રુતઃ ।
કાશીકથાસુધાં પ્રાપ્ય યે પિબન્તિ મુહુર્મુહુઃ ॥ ૮૮॥

તે શિવાનુગૃહીતાસ્તે પૂજનીયા મનીષિભિઃ ।
કાશીકથા શિવકથા સા કથા મોક્ષદાયિની ॥ ૮૯॥

તસ્યાં કથાગ્રાં પ્રીતિસ્તુ ન શિવાનુગ્રહં વિના ।
નિષ્કલં નિર્ગુણં બ્રહ્મ શિવઃ કાશીતિ ગીયતે ॥ ૯૦॥

તસ્યાં પ્રીતિરનન્તાનાં તપસાં ફલમુચ્યતે ।
તતસ્તત્પ્રીતિરુત્કૃષ્ટા તપસાં ચ ફલં દ્વિજાઃ ॥ ૯૧॥

કાશીમૂર્તિઃ શિવસ્યૈવ મૂર્તિભેદેન તિષ્ઠતિ ।
કાશીમૂર્તિઃ શિવસ્યેતિ વદન્તિ શ્રુતયો મતાઃ ॥ ૯૨॥

મૂર્તયઃ સન્તિ વિવિધાઃ શિવસ્ય પરમાત્મનઃ ।
તાસુ મૂર્તિષુ કાશ્યેવ શિવપ્રિયતમા સ્મૃતા ॥ ૯૩॥

કાશીમૂર્તિ શિવાકારાં શિવે દૃષ્ટ્વા મનોરમામ્ ।
શિવો દૃષ્ટ્વા ભવાનીં ચ પ્રીતો ભવતિ સર્વથા ॥ ૯૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિભિઃ પ્રોક્તં કાશીકથાસુધાપાનફલં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . vAvRRittashlokAH ..

Notes:

Ṛśi-s ઋષયઃ narrate their experience resulting from receiving the Nectareous Stories of Kāśī કાશીકથાસુધા from Sūta સૂત; who in turn tells them that such interest in Kāśī કાશી and stories related to it occurs only due to Grace of Śiva (Śivānugraha શિવાનુગ્રહ). He further reveals that Kāśī કાશી is an embodiment of Śiva શિવ Himself.

Encoded and proofread by Ruma Dewan

*Rishibhih Proktam Kashikathasudhapanaphalam*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*